# mahAprabhorAShTakam

# महाप्रभोराष्टकम्

## Document Information

Text title : Mahaprabhu Ashtakam

File name : mahAprabhoraShTakam.itx

Category : vishhnu, aShTaka, krishna, vishvanAthachakravartin

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Proofread by : PSA Easwaran

Description/comments : Riksaraja Prabhu popularized this song in his 1978 Golden Avatar album “Reservoir of Pleasure.” It was rendered in Raga Madhyamad Saranga in Bhajani Tala

Latest update : February 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2021

*sanskritdocuments.org*

# महाप्रभोराष्टकम्

स्वरूप भवतो भवत्वयमिति स्मितस्निग्धया
गिरैव रघुनाथमुत्पुलिकगात्रमुल्लासयन् ।
रहस्युपदिशन् निजप्रणयगूढमुद्रां स्वयं
विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ १॥

स्वरूप मम हृद्व्रणं बत विवेद रूपः कथं
लिलेख यदयं पठ त्वमपि तालपत्रेऽक्षरम् ।
इति प्रणयवेल्लितं विदधदाशु रूपान्तरं
विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ २॥

स्वरूप परकीयसत्प्रवरवस्तुनाशेच्छतां
दधज्जन इह त्वया परिचितो न वेतीक्षयन् ।
सनातनमुदित्य विस्मितमुखं महाविस्मितं
विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ ३॥

स्वरूप हरिनाम यज्जगदघोषयं तेन किं
न वाचयितुमप्यथाशकमिमं शिवानन्दजम् ।
इति स्वपदलेहनैः शिशुमचीकरद् यः कविं
विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ ४॥

स्वरूप रसरीतिरम्बुजदृशाम् व्रजे भण्यतां
घनप्रणयमानजा श्रुतियुगं ममोत्कण्ठते ।
रमा यदिह मानिनी तदपि लोकयेति ब्रुवन्
विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ ५॥

स्वरूप रसमन्दिरं भवसि मन्मुदामास्पदं
त्वमत्र पुरुषोत्तमे व्रजभुवीव मे वर्तसे ।
इति स्वपरिरम्भणैः पुलकिनं व्यधात् तं च यो
विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ ६॥

स्वरूप किमपीक्षितं क्व नु विभो निशि स्वप्नतः
    प्रभो कथय किम् नु तम् नवयुवा वराम्भोधरः ।
व्यधात् किमयमीक्ष्यते किमु न हीत्यगात् तां दशां
    विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ ७॥

स्वरूप मम नेत्रयोः पुरत एव कृष्णो हसन्न्
    अपैति न करग्रहं बत ददाति हा किं सखे ।
इति स्खलति धावति श्वसिति घूर्णते यः सदा
    विराजतु चिराय मे हृदि स गौरचन्द्रः प्रभुः ॥ ८॥

स्वरूपचरितामृतं किल महाप्रभोरष्टकं
    रहस्यतममद्भुतं पठति यः कृती प्रत्यहम् ।
स्वरूपपरिवारतां नयति ता शचीनन्दनो
    घनप्रणयमाधुरीं स्वपदयोः समास्वादयन् ॥ ९॥

इति श्रीविश्वनाथचक्रवर्तीठाकुरविरचितं महाप्रभोराष्टकं सम्पूर्णम् ।

*mahAprabhorAShTakam*

pdf was typeset on December 3, 2021

Please send corrections to *sanskrit@cheerful.com*